हि तथाहुः पतेव्यावर्त्तयति भावं देवानामधिकारस्य मन्यते बादरायण आचार्यः गौणसिद्धान्ताभावाय स्वनामग्रहणं कि
मर्थं ज्ञानेन तथा सति तत्र्यत्नमत आह अस्ति हि अस्ति वेदे प्रजापतिरकामयत प्रजायेयेति स एतदग्निहोत्रं मिथुनम
पश्यत् तदुदिते सूर्येऽजुहोदिति देवा वै सत्रमासतेत्यादिभिः कर्माधिकारो निश्चितः तथोपदेवानां प्रत्यक्षश्रुतमेव
47 तद्भवतीत्यादि तथैवेन्द्रप्रजापतिसंवादे ब्रह्मा देवानामिति च एवमेवंविधेभ्यो वेदेभ्यो देवानामप्यधिकारोऽस्ति यत्र च पुनर्दे
वानां फलभोगप्रतीपत्तेन कारणं नाप्ति तेषामधिकारो गीतानेवः हि यज्ञोपमर्थः एते हि वसवो आधिदैविक॰
भगवद्रूपभूताः अनश्नतां अन्यप्रार्थनत्वाधिविरोधः पयोहस्तेनाप्रातः सवनमित्यादिवत् तदिज्ञीवविशेषाद्दृष्टा
न्तमेतस्मादिदं ब्रह्मप्रकरणे देवा यो पि देवोपासनं च न प्रतीयते स भगवद्रूपस्य वाधिदैविकः न वा पूर्वकल्पेन निस्सं॰
यः तथा सति तेषामभावात् अन्यथास्य त्वनित्यता च वेदस्य स्यात् तस्माद्देवानामप्यधिकार इति शाण्डिल्यविचार एवयु
क्त इति सिद्धं शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि इदानीं शूद्रस्यादिकारो निराक्रियते यथा कर्मणि एतपाति ८७
षादस्थपतिं याजयेदित्यादि न त्रैवर्णिकानि शुश्रुतेर्विष्कदाचाचेति शूद्रस्येति लिङ्गात् ब्राह्मणादीन् च शूद्रस्याधिकारः एवमिहा॰

रग्गादिष्वृतद्वेदमिति व्यवधारस्य सिद्धत्वात् सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवं च पृथिवीं चान्तरि।
क्षमथो स्वरिति स्मृतेश्च सर्ववेदमयेनेदमात्मनात्मनात्मयोनिना प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरत इत्या।
दिस्मृतेः सर्वस्य तेष्वान्तर्यामिणाणापूर्वं चरितस्मरणस्मृतिरुच्यत इति अत्रो ऽर्थबले विचारे पि यद्यर्थानां नित्यत्वा।
त्तत्वेदस्यानित्यसंबन्धः मध्वादिष्वसंभवादनधिकारं जैमिनिः अर्थबलविचार एवैकदेशेन पूर्वपक्षमाह नन्व
मध्वादिविद्यासु देवानामनधिकारात् सर्वत्रैवानधिकारः तथाहि असौ वा आदित्यो देवमधु तस्य द्यौरेवेत्यादिना सू
र्यस्य देवमधुत्वं प्रतिपादितं रश्मीनां वेदत्वं च तत्र च वसुरुद्रादित्यमरुत्साध्याः पंचदेवगणाः स्वमुख्येन मुखेनामृत
दृष्ट्वैव तृप्यन्ति पंचविधा एव च देवाः सिद्धे च तेषां तन्मधुन्यनुपासकत्वान्न देवान्तरकल्पनाकृतार्थत्वाच्च ब्रह्मणो।
पि देवत्वमादित्यादिहेतू सर्वा एव देवोपासनविद्यास्त्वदीताः अजस्त्रैषामप्युपास्यत्वात् कृतार्थत्वाच्चानाधिकारः नहि प्रयो
जनव्यतिरेकेण — वित्तमहत्त्विःसम्भवति मोक्षस्याप्यधिकारनिवृत्त्वाद्युत्तरमार्गवर्तित्वात् स्वत एव सिद्धेः यावदधिका
रमिति न्यायात् वसून्न यजेयदि मत्रापि भावित्वं वसुत्वात् तस्मान्मध्वाद्यधिकारकमेव ज्ञानेन कर्म चेति न देवानामधिका
र इति जैमिनिराचार्यो मन्यते मन्त्राणामेव ज्ञानकर्मणोस्तत्रतत्र भाववत्त्वात् तत्तदुपभोगानन्तरं मोक्षप्राप्तेरिति।
ज्योतिषि भावाच्च किं च तेषां सर्वेषामनधिकारः प्रत्यक्षत एवाऽऽदर्श्यते सर्वे हि नक्षत्रादिरूपेणामह्नो भगवतो जगद्व

48

धिकारं मत्वा नस्य निराकरणार्थं हेतुमाह उत्तरत्र चैत्ररथेन लिङ्गात् । अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनि
मित्युत्तरत्रैवास्मिन् क्षत्रियो नौ निर्दिष्टेकत्वाभिनाथस्येति कक्षसेनस्यापत्यं काक्षसेनिरिति अस्य व्याख्यानं चैत्ररथ इति चि
त्ररथस्यापत्यत्वस्याथ त्येते न चैत्ररथेन कक्षाद्वपारथा इति व्याख्यानं एतेन वै चित्ररथं कापेया अयाजयन्निति शौनकस्य
कापेयो याजकस्य याज्यश्चित्ररथस्य पुत्रः काक्षसेनिरिति ब्रह्मचारा ब्रह्मवित्तु उभौ तु संवर्गविद्योपासकौ प्राणप
हृमितात्तस्मात्तद्ददतः उभावपि स्त्रैकौ भगवतः तेन प्रकृते पात्रिंगरूपिष्याद्भक्षणविधावेवेति गम्यते तस्मान्नता
तिश्रुतः संवर्गविद्यायामधिकारी संस्कारपरामर्शात्तदभावाभिलापाच्च इदानीं शूद्रस्य कश्चिदपि दपि ब्रह्मविद्या
यामधिकार इत्युच्चापि कल्प्यते तत्तु नास्ति सर्वत्र संस्कारपरामर्शात् उपनयनसंस्कारः सर्वत्र परामृश्यते तं होपनिन्ये
अधीहि भगव इति होपससाद तान्हानुपनीयेत्यादिप्रदेशेषु उपनयनपूर्वकमेव विद्यादानं प्रतीयते शूद्रस्य तत्तदभा
वाभिलापात् चतुर्थ एकजातिस्तु शूद्र इति नश्यदपात्तकं किंचिन्न च संस्कारमर्हतीति शूद्रस्य संस्कारनिषेधात् चकारात्
न शूद्राय मतिं दद्यादिति निषेधः तदभावनिर्धारणे च प्रवृत्तेः अतश्च शूद्रस्य न संवर्गाधिकारः तदभावनिर्धारण एव गुरु
शिष्यभावप्रवृत्तेः सत्यकामो ह जाबाल इत्यत्र गौतमः सत्यकाममुपनिन्येन तदब्राह्मणो विवक्तुमर्हतीति सत्यवचने
न शूद्राभावे ज्ञात एव चकार एवार्थे चकारेण निर्धारणानन्तरमयत्नानार्थं चशब्दान्तं शूद्राभावे च तस्मान्न शूद्रस्याधिकारः श्रवणा ५८

पि संवर्गविद्यायां शूद्रस्याधिकार इति तन्निराकरणार्थमिदमधिकरणमारभ्यते सर्वा हि श्रूयते जानश्रुतिर्ह पौत्रा
यणापत्यं त्रह्हंसवाक्यश्रवणानन्तरं संवर्गवतो रयिक्वस्य समीपं गतः जानश्रुतिः पौत्रायणः रयिक्वेमानि षट् शतानि गवा
मित्यादिना देवतां पृष्टः प्रत्युवाचाहहारेत्वा शूद्र तवैव सह गोभिरस्त्वित्यादिना जानश्रुतिं शूद्रशब्देन संबोध्य पुनश्च
शूद्रानेनैव मुखेनेत्युक्त्वा संवर्गविद्यामुपदिष्टवान् अतो नैविद्यायां जातिशूद्रस्याप्यधिकारीति तथामेवोधनं तदा
शुक् शोकः अस्य जानश्रुतेः समजनीत त्रदेवं तदनादरश्रवणात् तत तदस्मात् हंसानादरस्य श्रवणात् कं वर एन
मेतत्सन्तं सयुग्वानमिव रयिक्वमात्थेति स्वापकर्षश्रवणात् किमतो यद्येवमत आह तदाद्रवणात् तत तदनेनं रश्रा
द्रवणात् शुचमनु आद्रवतीति शूद्रः परोतवादादेर्दीर्घः सर्वत्वापनायाः रूढिर्योगमपहरतीति न्यायात् कथमेवमत
आह सूच्यते हि स्वस्य सर्वज्ञत्वं सूच्यते दं सवाक्यात् लोके जातेत्यमागत इति अन्यथा प्रपन्नस्याधिकारवचनमनर्थकं स्या
त् युक्तश्चायमर्थो ब्रह्मविदः सर्वज्ञत्वेन तस्मात् तथ्यनिराकरणं वा संबोधनफले तस्माच्छुचं प्रत्याद्रवनादेव शूद्रपदप्रयो
गो न जातिशूद्रवाचीऽत एवमत आह क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिंगात् जानश्रुतेः पौत्रायणस्य क्षत्रियत्वमव
गम्यते गोनिष्करथकन्यादानात् न हि शूद्रेऽपि प्रभूततया क्षेत्रे तत्त्रिपादत्वमस्य संभवतीति राजधर्मत्वात् न हि स्यो ब्रह्मणापभा
र्यात्वेन कन्यादानं घटते इत्याप्रथमं हंसवाक्येण द्वेसंगच्छते उपदेशाच्चेति चकारार्थः तथापि संवर्गविद्यायां शूद्रस्यैवा

तः प्राणशब्दवाच्यत्वेन पूर्वमेव सिद्धं तस्मात्सर्वजगत्कंपनं भगवत्कृतमिति भगवानेव वाक्यार्थः ज्योतिर्दर्शनात् ।
एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरभिसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति तत्र संशयः परंज्योतिर्महाभूत
रूपं ब्रह्म चेति अत्र प्रथमाध्याये केचित्सिद्धा युक्तापि साधितैः निःसंप्रकाशतोप्यन्ये चत्वारो चनिरूपिताः तत्र तद्रूपेणोपप
त्याच महाभूतमेव ज्योतिरित्येवं प्राप्ते उच्यते ज्योतिर्ब्रह्मैव कुतः दर्शनात् दर्शने सर्वत्र दर्शनेन्याय इति यावत् सप्तमोऽस
र्वत्र सता सोम्य तदा संपन्नो भवति सजि संपद्य न विदुः सति संपद्यामह इति अहरहर्ब्रह्मलोकं गच्छन्तीत्यादिप्रदेशेषु ब्र।
ह्मसंपत्तिरेवोक्ता अत्रापि संप्रसादवचनात्परंज्योतिर्ब्रह्मैव तस्माद्यः कश्चन शब्दो ब्रह्मस्थाने पठितस्तद्ब्रह्मवाचक एवे
ति आकाशोऽर्थान्तरत्वादिव्यपदेशात् आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति श्रूयते तत्राकाशशब्देन सं
देहो भूताकाशः परमात्मा चेति नामरूपनिर्वाहमात्रत्वमवकाशदानाद्भूताकाशस्यापि भवतीति न ब्रह्मपरत्वमस्य
स्य च नियामकस्याभावादित्येवं प्राप्ते उच्यते आकाशः परमात्मा अर्थान्तरत्वादिव्यपदेशात् यद्भूताकाशस्य प्रयोजनं
श्रुतिसिद्धं तस्मादन्यस्य व्यपदेशः कार्यान्तरादिव्यपदेशश्चापत्रैव हि सिद्धवत्कारेणोत्कृष्टधर्मा अन्तर्दीपास्तदेव ब्रह्मेति
नापि नामरूपनिर्वाहिकाशस्य माकाशान्य— द्धेतुर्भवतीति निश्चयेनेति सिद्धवत्काराच्चोपासनापरत्वे निवोदस्य ब्रह्मल।
धर्मत्वेन कृत्यन्तरसिद्धमिति विचारः अपच्यपि निसूचकस्त्वयमेव न्यायधर्मि [illegible] इति तस्मात्यत्रैवात्तद्धर्मकथनमस्य वाच्च ४९

ध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥ इतश्च शूद्रस्याधिकार विनावेदस्य श्रवणमध्ययनं अर्थज्ञानं च प्रतिषिद्धं स्मृतिषिद्धं तत्संनिधावत्त्व।
स्य च अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमिति पद्यु ह वा एतत् श्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्ये
तव्यमिति उदाहरणे जिह्वाच्छेदो धारणे शरीरभेद इति दोहादोष्ट्र दर्शयेवे धर्मंचानामभाव एव स्मृतिप्रभृतिष्वपि वेदाधिकार
इत्यादि स्मृतेश्च वेदान्तरविचारेण शूद्रः पततितत्त्वादिति च कारस्तदधिकरणसंपूर्णत्वद्योतकः सांत्रैवर्णिक।
ज्ञानाधीतकारणविशेषेण शूद्रयोनिगतानामद्धातमधिकारः तत्रापि न कर्मजातिशूद्राणां तस्मान्नास्ति वैदिके कचि
दपि शूद्राधिकार इति स्थितं कंपनात् कट्वदन्नी विचारेणानिश्चिताद्यधिकारिणः वाक्यान्तरं च तन्नत्यं चिन्त्यते प्रलयाव
धिपदिदं किंचिज्जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्तीति अत्र प्राणवज्रोद्यमन।
शब्दाभ्यां संदेहः किं प्राणोपासनार्थं हो पा मनाव ब्रह्मवाक्यं वेति वा धक शाब्दस्य श्रुतिनान्यप्रकरणेन निर्णयः अमनवेप्रा
णइति श्रुतेः प्राणोपासकस्य व्यमजपाप्तिं पुंजयोतेरं ह स्यापिमनत्वात् वज्रमुद्यतमिति प्राणपत्ते विपोत्त नेमरणजनक
त्वाद्भयरूपत्वे इंद्ररूपत्वे वलाधिश्रुतत्वात् प्राणत्वेन स्मात् प्राणे रेंद्रो वा वाक्यार्थ इति एवं प्राप्ते उच्यते कंपनात् कंपनमत्र।
प्रथमवाक्यार्थः स च भयहेतुकः अविशेषेण सर्वजगत्कंपनं भगवद्धेतुकमेव भवति न चैकांततो वज्रमिंद्रस्यैवा।
युधं भवति अविरुद्धत्वात् न तस्यतान्नस्य हृदयमाक्षिदत्तसापानिरभवदितिश्रुतेः तस्मान्मारकरूपमेवेदं भगव

अ.ग्र. शब्दात् जीवस्यानीशित्वात् येन प्रकारेणायं जीवः परलोके गच्छति तत्प्रपाये भगवानेव करोतीत्यर्थः खल्विति भगवतो।
५० नजागरितस्वप्नभेदोस्तीति पदतः परं स्वयंज्योतिष्ट्वं तत्र स्पष्टं एतावद्दूरे भगवच्चरित्रमंगीकृत्य जीवविमोक्षार्थं प्रश्नः स
चाप्येष इति जीववाकं तस्य सहजः संगो वास्तीति स्वप्नसंगाभावे प्रत्युत्ततः प्रदर्शयन् असंगत्वमाह तावतापि जागर।
णावस्थायां संगत्वज्ञातापद्युतः प्रश्नः तत्र मत्स्यदृष्टान्तेनावस्थाभेदज्ञानापक्रियाज्ञानप्रधानेश्येनस्वपर्णादृष्टान्तस्त्वस्व।
षुप्तो भगवत्स्वरूपप्राप्तये अवस्थान्तोपत्रेति च भगवान् पंचवर्मनाडीकृत एवास्य क्लेशो भगवत्कृत एवामेद इति स्व।
50 मार्पदो भगद्रूपः परमो लोकः सुषुप्तिस्वकामरूपो भगवान् अनुरत्नाभावाड भयोः स्पष्टतया भेदनिर्देशः शारीरः प्रा
ज्ञ इति नामाह्लादतामावेतिक्षेदः तत्र भगवत्स्वरूपं गतस्य वात्येडिप धर्माभावमाह विज्ञानीपादिसंतेनवाह्येन्द्रियाणां
सलिलत्वमिति पूर्वोपपत्तिः एष ब्रह्मलोक इत्यारभ्य अनन्यशाखासेतत्दमन्तमित्यंतेनानेद भगवान् प्रतिपादितः फल
त्वापपत्तौ भयमंगः प्रतिपादितः तस्मान्नभवाद्गृहत्वायपुत्रः प्रश्नः दर्शनादर्शनावायोह्यापाभ्यां सिद्धमसंगोप्यपेत्र
रुष इति एवं जीवस्य सुषुप्तौ भगवंतं च ज्ञात्वा मोक्षोपायं पृच्छति तत्र याज्ञवल्क्यस्य भयं जातं स्वबुद्धिरपंति वैधेनापि सर्वं ज्ञा
स्यतीति जीवब्रह्मधर्माने काकृत्य जीवोपक्रमणाब्रह्मोपसंहारेणाह सपत्रेति जीवस्य मूर्छोपतायावस्यानत्यथाश्च
मन इति मरणावस्थां तत्र भगवानेवैनं लोकांतरे नयति तद्यथा राजानमिति भगवतः सत्त्वाने एवं विदमिति वचनात् ५०

स्यतत्रैव ब्रह्मपरत्वमिति सिद्धं ॥ सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशाद् बृहदारण्यके ज्योतिर्ब्राह्मणे याज्ञवल्क्य किंज्योतिरयं पुरुष
इत्यारभ्याभयं ह वै ब्रह्म भवति य एवं वेदेत्यन्ते संदेहः किं ब्रह्मवाक्यमेतत उत जीवस्येति जीवस्य ब्रह्मत्वप्रतिपाद
नेजीववाक्यत्वं स्यात् अन्येषां ब्रह्मणां एव ज्ञानकर्मत्वे ब्रह्मवाक्यत्वमिति यद्यप्यर्थज्ञानेन संदेहः तत्र प्राप्तमिति यामके द्वैत
माह भेदेनेति तस्यायमर्थः किंज्योतिरयं जीव इति प्रश्ने सूर्यचन्द्राग्निवागादि प्रकरणेन जरं आत्मज्योतिः आत्मा भगवा
नेवास्य ज्योतिरित्युत्तरानन्तरं कतम आत्मेति प्रश्ने योऽयं विज्ञानमयोक्तानन्तरूपः इन्द्रियेषु हृदि च प्रकाशमान इत्युक्तत्वे जी
वोपि तादृश इति तन्निराकरणार्थं समस्मातः सत्त जीवतुल्यः सन् क्रीडतीत्याह तस्याभयधर्मोपपत्तेश्चेतने क्रियामात्रस्य
तन्मूलत्वात् एतत्र हि चत्वारि स्थानानि अयं लोकः परलोकः स्वप्न इति त्रयं जीवस्य समानत्वात् तथात्वं भवति तत्र स्वप्नस्य
मिथ्यात्वात् न हृदयमेव सुषुप्ते च चतुर्थं जीवस्य तन्मात्रेपि नत्राप्सि कोके जीवस्यानीशित्वं भवत्वत्सिद्धं मोक्षे त्वेकं स्वप्न
स्तु मायामात्रः परं हृदयमेवावशिष्यते न च सुषुप्त्येव भेदः प्रतिपादितः तत्र भगवतो जीवसाम्येप्यतः करणेंद्रियधर्माः
प्राप्नुवन्तीति तत्रान्तःकरणमाह ध्यायतीव लेलायतीवेति बुद्धिसहितः स्वप्नमेव स्वप्नो भूत्वा जागरणादि संधानं
न करोतीत्येवं जाग्रत्स्वापौ ब्रह्मणोल्लोकद्वयं जीवस्य स्थानत्रयमाह स चाप्यपसिद्धान्तिकोडिकाद्वयेन सइति पूर्वपक्षो
तो जीवजीवस्य शरीरेन्द्रियाणां उः त्वदन्तमेवमथेति भगवच्चरित्रे समत्व स्वसमाने दे जीवस्य उः त्वं च पश्यति भेदोप

अ.पा. आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च एवं सर्वेषां वेदान्तानां ब्रह्मपरत्वे स्थितेऽपि
५१ केचिदिहेदमर्थाज्ज्ञानात् केचिदिह दृष्टभागे कापिलमतानुसारिप्रदर्शनेन तस्यापि वेदमूलकत्वं वदन्ति तन्निराकरणाय
चतुर्थः पाद आरभ्यते तत्रेदं तावत् तेनोक्तं ग्राह्यमिति सांख्यमतमशब्दत्वादिति निवारितं वेदेन प्रतिपादितमिति तत्राशंकते
आनुमानिकमप्येकेषामेकेषां शाखिनां शाखासु सांख्यपरिकल्पितप्रकृत्यादि श्रूयते इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च
परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा।
51 काष्ठा सा परा गतिरिति काठके श्रूयते तत्र बुद्धेरात्मा अहंकारः ततो महान् महत्तत्त्वं ततः अव्यक्तं प्रकृतिः ततः।
पुरुष इति न सांख्यकारादयः पदार्था ब्रह्मवादे संभवन्ति तस्माद्वेदजातीयकेषु तन्मतपदार्थानां श्रवणात् सांख्यस्मृ।
त्यविद्यावादा अपि श्रौता इति चेत् न प्रायपाठमात्रेण न तन्मतं सिध्यति संदिग्धानां पदार्थानां पौर्वापर्येण नि।
श्चयः न तत्संदिग्धवाक्येन सर्वं व्याकुलं तच्चिन्ता अत्र हि पूर्वमात्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सार
थिं विद्धि मनः प्रग्रहमेव च इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषि
णः तदत्र चत्वारि वाक्यानि परस्य विज्ञानवानित्यादि तदन्विन्द्रियेभ्यः परा इति तत्र पूर्वसंबद्धपदार्थ उचितः तस्मा
द्धशरीररूपकविन्यस्तगृहीतेः शरीरेणानुप्यन्ते ये शरीरेन्द्रियादयः ते विन्यस्ताय ते रूपकभावेन रथादिषु तेषामेव ५१

जीवस्तु नैनेव वित्त सिद्धवद्वचनान्ननु ज्ञानविधिः वाक्यभेदप्रसंगाच्च संपद्येति जीवे मोक्षोधिकः अथ यैतन्मेते प्राणा इति भगव
च्छरीरे संपद्यत इत्येतेन श्लोकेनतत्र ब्रह्मण एव जीवस्य अकामयमानस्य भगवतः स्वरूपं पूर्वमेवोक्तमतस्तद्वदति भगव
न्निरामने प्राणानां निगमनतानतस्य चेष्टाधीनत्वात् तदभावे इन्द्रियाणि सर्वशोतनैव समवलीयंते ब्रह्मैव सन्नत्र
टस्थः सन्नपि समन्वय संदृश्यते जीवे ब्रह्माविर्भवतीत्यर्थः जीवे ब्रह्माविर्भावो न संगत इति नत्यज्ञति पादतार्थः श्लोकः
जीवोपदेशप्रकरणाभावेन सिद्धवद्वचनाच्च जीवन्मुक्तावस्थानाप्यसंप्रज्ञातसमाधिः मतांतरत्वात् ब्रह्मप्रकरणान्वा
न्नजीवस्य सद्योमुक्तिः फलेऽज्ञे मण एव ब्रह्मणो ज्ञानत्वान्नतद्यथेति सर्वशब्द शारीरं अनस्थिक इत्यादिसंभाडित्येतन्न
पसंहरः श्लोकास्त्रयोदशसर्वनिर्णयकाः आयोवत्सकिंते पर इति सर्वशब्दानाडीत्वात् पंचवर्णाश्रयेन मइति ह्यभ्याम
नैवविदो निदातदेवसंतइति बुद्धिमताव चनेनात्मानमितिवैराग्यपस्यान्नचिन्निरितिनवमिभगवन्तैःत्क्तं तिस्तहिज्ञा
नेचपुनरेतदेवसर्वतपोपदिशति सर्वाययमात्मेत्यादि अभयं वैजनकप्राप्तोसीत्येतेकारावातोकचित्पाठभेदेप्य
यमेवार्थः अत्र प्रकरणे जीवो वाच्य इति प्रमेप्रभिधीयते ब्रह्मैव प्रकरणार्थः हृदयस्थोऽक्रमणे च जीवब्रह्मणोर्भेदेनव्य
पदेशात् आकाशवत्तब्रह्म निर्धारणवदुक्तः पत्यादिशब्देभ्यः किंच सर्वस्य वशीत्यादिशब्दोऽयः स्पष्टमेव ब्रह्मप्रकरण
मिति इति श्रीवेदव्यासमतवर्त्ति श्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः ॥

अ॰ए॰ परत्वमनुपपन्नं अन्यथा पूर्वोक्तदोषस्तस्मात् अभेदेपि कल्पनया तदधीनत्वात् परत्वं तत्तदंशेन ततः अर्थवत् अर्थः
५२ पुरुषार्थः पुरुषार्थः फलं तेन हेतुना ब्रह्मविदाप्नोति परमिति श्रुतेः एकस्यैव ब्रह्मणः सविशेषरूपेण विषयत्वमानेन रूपेण फल
त्वमिति तथैवान्तरपुरुषाणाम् विभागोपि स्वधर्मात्मनि स्वाधीनाः स्वयमपि स्वाधीन इति तथा कल्पा विषः साधनत्वेनान्तरू
पः फलमिति अथवाव्यक्तं सविशेषरूपमन्तरमेवात्मज्ञाने सति पि ज्ञानस्यावेशयाधीनस्वमर्थः एतेनान्येपि सर्वे संप्र
दायादिनो निराकृता वेदितव्याः असंबद्धाभिलापाच्च अनेकरूढिप्राधान्यतो वा च्यवन्ते वैदिकनापरं शाक्तास्तोवेत्तथान्ये प्रयुक्ते
सन्मार्गात् बहिः कृताः तस्मात् त्रिभ्यः परत्वावेनानुमानिकं किंचिदस्ति ज्ञेयत्वावचनाच्च पूर्वापरसंबंधेनार्थः
52 प्रतिपादितः केवलं तद्वाक्यविचारेपि न तदभीष्टप्रकृतिरूपमव्यक्तं सिध्यतीत्याह अत्रहि वाक्ये अव्यक्तं ज्ञेयत्वेन नोक्तं।
तेषां तु प्रकृतिपुरुषान्तरज्ञानं तेन हि सिद्धवन्माञ्च निर्दिश्यते तेषां मते पुरुषार्थः सिध्यति अपुरुषार्थसाधनत्वे असंबद्धार्थ
वाक्यत्वमवस्यात् परत्ववचनेनाचासंगतेस्त्रिगुणत्वादुभयोरिति चकारार्थः अपेक्षितः पूर्वमुक्तोपि उपसंहारे स्मारितः तस्मादव्यक्तं।
न प्रकृतिः वदतीति चेन्न प्राज्ञो हि प्रकरणात् नन्वज्ञेयत्वावचनमसिद्धं पूर्वं निर्दिश्यमानं च लक्ष्यं ज्ञेयत्ववचनात् अशब्दम-
स्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति उत्तरवा-
क्ये वदतीति चेन्न प्रकरणस्य नियामकत्वे नैकवाक्यत्वे द्वयोः सर्वैकवाक्यत्वेन प्राज्ञः परमात्मैव निचाय्यः न तु द्वयोरेवैक ५२

त्वगृहीतिश्रेहणं अन्यथा प्रकृतहानाप्रकृतपरिग्रहापत्तिः जीवप्रकरणे हेतत्त्वकत्वपाठो सहृप्यते शोरंपशरीरा
मारूह्यागच्छेदितिहरे पदेजत्रजीवस्वरूपप्राप्तौ मोक्षसाधने शारीरे रथः सर्वसामग्रीसहितापराधीनपानत्वात्
रथस्तदपाधीनः इपाश्वस्तद्व्यधीनः सा च प्रग्रहाधीना स च सारथ्यधीनः स च स्वद्व्यधीनः सा च मार्गाधीना स च प्रा
प्याधीन इति एवं ज्ञात्वा एतत्सामकस्तदेशं प्राप्नोति तत्रैन्द्रियाणामात्मा विषयाः ते च मनसा सम्यक्तेन भाविताः स्व
प्याभवेति विरक्तेन्द्रियाणामनर्थात्वात् बुद्धेगत्वाविज्ञानेनतद्वसविषयके महद्भवति ततः परमव्यक्तेन प्रकटं भ
गवत्स्वरूपैकमानं भगवदधीनानसाधनानि तदधीनानि स च भगवान् स्वाधीन इति एवमेवार्थस्तस्योचितः किंच द
र्शपतिस्वयमेवेममर्थं — एषुसर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति
सूक्ष्मयोपनिषदन्तसारिण्या बुद्ध्या भगवज्ज्ञानेद्रिततत्त्वाभिरिति च कारान्ततो भोक्तत्वनोज्ञात्वाविशातेतदनेतरभि
ति स्मृतिरङ्गीता तस्मात्साधनोपदेशानन्तसांख्यमतमिद्ध्यवदितमिति सूक्ष्मं तत्तदर्हत्वात् नन्वव्यक्तश
ब्देन न भगवत्स्वरूपावक्तेपाका धर्मिप्रवाहादित्याशंक्य परिहरति शाहुः सूक्ष्मं तद्वत्तैव धर्मधर्मिणोरभे
दात् अव्यक्तशब्देन हि सूक्ष्ममुच्यते न तद्वद्धि सर्वप्रकारेण न व्यज्यते अर्हत्वात् तदेवम्यर्हेयोगेडभयत्राप्युप
देतः तस्मात् धर्मधर्मिणोरभेदात् भगवानेव सूक्ष्ममिति तत्रूपैवाच्या तदधीनत्वादर्थवत् नन्वधर्मितेर

ब्र०सू० ति दिग्या दिवाकैः सांख्यपरिकल्पितानां पदार्थानां नामापि नास्तीति सिद्धं चकारोऽधिकरणासंपूर्णत्वद्योतकः चमसवद
५३ विशेषात् प्रतन्त्रस्य जरेण प्रतिबध्यते निराकर्तुमधिकरणांतरमारभते तन्त्रप्रकरणवृत्तान्त पूर्वमस्मिन्कोऽर्थोऽन्यथाव
र्णितः यत्र प्रकरणे ऐतेवनास्ति मंत्रेतदस्माकं मूलं अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अ
जो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति पपठिते श्वेताश्वतरोपनिषदि च तद्व्याख्याये विद्यमानत्वा
त् पूर्वापरसंबन्धमेवं वक्तव्यं तत्र ब्रह्मवादिनो वदंति किं कारणं ब्रह्मेत्युपक्रम्य ब्रह्मविद्येव तितनिष्पिता तथापि पूर्वकांडे
53 प्रणवादिमंत्राणां नायं नियम इति प्रकृतेऽपि मंत्रांतरवाचकस्यैव प्रकृतोपयोग इति शंका ते ध्यानयोगानुगता अपश्य
न् देवात्मशक्तिं स्वगुणैर्निगूढामिति च तथा ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता अन्ये च यो यो
निं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदि
च वाक्यानि कपिलतन्मतवाचिकानि वर्तन्त इति सांख्यमतमपि वैदिकमेवेत्येवं प्राप्त उच्यते चमसवदविशेषात् अर्वा
ग्बिलश्चमस ऊर्ध्वबुध्नः तस्मिन्यशो निहितं विश्वरूपं तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति मंत्रेय
थान विशेषो विधातुं शक्यते मह्विकर्मविशेषकल्पयित्वान्तत्रार्वाग्बिलचमसकल्पापित्वात्तत्र यशोरूपं सोमं स्वमहोता
रोमं त्रेणाभवत्येवमेरिति कल्पयितुं शक्यते तथा प्रकृते लोहितशुक्लकृष्णप्राधान्येन रजःसत्वतमांसि कल्पयित्वा न दृष्टेन ५३

वाक्यान्तरवक्तृशङ्कां तस्मात्प्रकरणस्यानियामकत्वेऽप्यशब्दवाक्यमपि भगवत्परमेव त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।
ननु न वयं सर्वमेकं प्रकरणमिति वदामः किं त्विदिप्येभ्यः परागुत्तरारभ्यतश्चैकैतमुपाख्यानमित्यतो भिन्नं प्रकरणं तत्र प्र
श्नमेपदार्थनिरूपः तदनुपपन्नं भूतेश्चितिप्ररूपजातेऽप्यशब्दमिति तत्प्रकृतिज्ञानेन तस्मादेतावान्प्रकरणैक्यमत नि
रूपणाद्दशब्दत्वमसिद्धमित्याशंकां परिहरति त्रयाणामेव मुपन्यासः प्रश्नश्चास्मदुक्तव्याख्याने त्रिप्रकरणत्वे अ
न्यथा चतुःप्रकरणत्वं स्यात् तृतीयाच्चेषा वल्ली स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधानाय मह्यमिति प्रश्नः प्रथ
मः प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् उत्तरं येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्ती।
ति चैके इति द्वितीयः प्रश्नः देवैरत्रापीत्यग्रे उत्तरं अन्यत्र धर्मादन्यत्राधर्मादिति तृतीयः प्रश्नः सर्वे वेदा यत्पदमामने
न्तीत्यादिनोत्तरं एवमग्निजीवब्रह्मणां प्रश्नोत्तराणि तत्र प्रदर्शिताख्यमतनिरूपणोपमिद्धियेमः उत्पादि स्यात् तदा चतु।
र्थस्याप्युपन्यासः स्यात् उपन्यासेऽपि न तु प्रश्नः अत एव पश्चाद्वचने तस्याप्रकृतेऽभावादस्मदुक्तरीत्या त्रीण्येव प्रकर
णानीति सिद्धं उत्तरप्रश्नभावार्थश्चकारः महद्वच्च ननु तथापि महतोऽनन्तरं व्यत्ययमर्थकेति नाः कथं ब्रह्मवादे ब्रह्मपरतया यो।
ज्यत इत्याशंकां परिहरति महद्वत् यथा महत् शब्दो महान्तं विभुमात्मानं वेदाहमेतं पुरुषं महान्तमित्यादौ महच्छब्दो ब्र
ह्मपरो योगे न एवमव्यक्तशब्दोऽप्यन्तरं वाचक इति न दृश्यमानाख्यमत एव वेदान्तेऽपि महच्छब्दः प्रधानकार्ये वर्त्तते शक्यते तस्मा

ब्र·सू· याह्यजावर्करसहितामवस्तात्वामिहितानपेयमितिउपदेशापदान्नयोपासनमभिप्रेतं चकारात्परोनवादोपिदेव
स्यहिताय यथाआदित्योवेदेवमधुवाचेयेनमधुपासीतफलेलोकालोदीनं चाग्नित्वेपेचाग्निविद्यायांतपाप्रकल्पनमपि वि
५४ रोधायोगरूढिव्यतिरेकेणाप्येषावेदशब्दप्रवृत्तिरिति तस्मादजाशब्देननसांख्यमजमिहिनंसंख्योपसंग्रहादपिनाना
भावादतिरेकाच्च मंत्रांतरेणपुनरपिशंकापरिहरतिवृहदारण्यकेषष्ठेश्रूयते यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठितः त
मेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृतमितिपद्यत्रपंचजनाःपंचोच्यंते नपंचानांपंचगणानांसमासानुपपत्तेःतथा
54 हि आद्यःपंचशब्दःसंख्यावाचासंख्येयवाचीवाआद्यपंचसंख्यापापेक्षत्वान्नषष्ठीसमासःसंख्यापोसंख्याभावाच्च।
संख्येयपरत्वेद्वितीयस्यसंख्यात्वेपंचत्वमेवएवंवदेदनन्वयःविधायकाभावाच्चअतोवीप्सापंचजनसंज्ञाविशिष्टेनोवापं
चत्वमितियथासंभवमर्थःतथापिमूलशब्देनसंख्योपसंग्रहेविलक्षणार्थेकेनचिद्धर्मेणपंचसंग्रहेकेणाभावमसंचतेषा
मेतेनसंभवति तथासतिपंचेवतत्वानिस्युःअतस्तेनानाभावाएवस्वीकर्तव्याःपाद्यपिभूजनत्वाचाकृतिविन्नित्यतस्थि
तत्वधर्मावच्छेशकेनतथापितेतत्वोक्तेवेतःमूलप्रकृतिर्नविकृतिर्महदाद्याःप्रकृतिविकृतयःसप्त षोडशकस्तु
विकारोनप्रकृतिर्नविकृतिःपुरुषइत्यन्यपोपगमात् सूत्रकृषिर्वलक्षणभावप्रसंगाच्च किंचनापंच्यत्यर्थइतिस्फु
तावेवप्रतीयतेअतिरेकात्आकाशश्चेतिचकारादात्मायस्मिन्नितितिधिकरणत्वेनोक्तः तस्मान्नानेनापिमंत्रेणतन्मत ५४

सर्वमेव मतं प्राक्तनेकल्पयितृकपिलक्षपिवाक्षमपि नित्यसंयोगभयात्रित्यक्षषेरेवानुवादकेन तस्मात्तमेत्रमात्रेण।
प्रकरणः श्रुत्यन्तरनिरपेक्षेण विशेषः कल्पयितृशाक्यः ज्योतीरूपकमात्रतया ह्ययोयतएके नन्वचमसमेवेश्रवो।
गविलश्इति मेत्र व्याख्यानमस्ति शिरस्थमस्मः प्राणावैपशूः प्राणवात्तषपञ्चति नात्रतथाव्याख्यामस्तीती मामाशंकोप न
रिहरतितत्र शाहः अतोशाहेन ज्योतिर्वोच्यते यथा हंसः अल्पदोगीतच्छंघेनश्वरस्त्रवधात्रो अशिस्तूर्यसोमविश्वरूपाहस्य
एगहंसोऽजश्चरणानूपा भगवत्कार्थेरूपोशत्वात्तेना सात्रिवृज्जित्रिवृत्तमेकेकां करवाणीति श्रुतेश्च प्रथमोत्पन्नादेवगाऽज्जा
शाहेनोच्यते तत्रहेतुरूपकल्पना अनेनैवोपक्रमेतदेवाग्निस्तदादित्यस्तदु चेदमाइति द्वासुपर्णेति चाद्येमध्येचा
घेमेत्र पूर्वोत्तरसेवहूमेवचदति साश्वाख्यासपृष्ठिः अजहूयंजीवब्रह्मरूपमिति अत्रप्रकरणेनस्पष्टइतिनिरूपयति त
थाहि श्रुत्यन्तरे स्पष्टमेवमधीयते एकेपदशेरोहितः नपेतेजसस्तरूपं यत्कृष्णनदपोयत्कं सेतदन्नस्येति एवमग्रेपिकल्प
त्रयेश्च नेनजीवेनात्मनेति जीवब्रह्मणोरात्मप्रवेशः वीजोपिश्रेविध्यमितित्रिरूपतंभगवतश्चभोगेहेतुजीवेन भक्तभोग।
मितितस्मान्नप्रकृतेपिचमसवत्रुतावेवार्थकल्पना त्रसंख्यामतप्रतिपादकत्वे कल्पनोपदेशाच्चमध्वादिवदविरोधः न
नुहिविधाशाह प्रवृत्तिः योगोरूढिर्वीतत्राजाशाहः द्वागाधानूढः नजायतइतियोगः अतिभयनूपत्वात्कथंसृष्टिवाच।
कत्वमित्याशंक्यपरिहरति कल्पनापदेपदेशाच्चकल्पनाचोपदिश्यते आद्यासृष्टिः कल्पातघाअतोशाहेनोच्यते य

अ.पा. नोमेवः तत्र तत्तेजो ज्योतिषां ज्योतिरिति श्रुत्यन्तरस्थितेत्योति शब्दः स्यात् ज्योतिःपूर्वमेव तस्मात् सिद्धं न तन्मात्रस्य तिमूलत्वे का
५५ रणत्वेन वाकाशादिषु यथाव्यपदिष्टोक्तेः श्रुतेर्विप्रतिषेधात्स्मृतेर्वेत्याशंक्येतिमते हूरीकर्तुं श्रुतिविप्रतिषेधो नास्तीत्यधिकर
णमारभते तत्र श्रुतौ सृष्टिभेदा दृश्यन्ते क्वचिदाकाशादिकाः आत्मन आकाशः संभूत इति क्वचित्तेजःप्रभृतिकाः तत्तेजो
ऽसृजतेति क्वचित्प्राणपूर्विकास्तस्माज्जायते प्राण इति इदं सर्वमसृजतेति च एवं क्रमव्युत्क्रमानेकविधत्वात्सृष्टिप्रतिपाद
कत्वात् वस्तुनो द्वैरूप्यासंभवात् यद्वान्यत्र मनजापशवः प्रजापतेरितिवत् सृष्टिवाक्यान्यर्थवादत्वेन ब्रह्मस्वरूपज्ञा
55 नार्थत्वाद्यारोपापवादन्यायेन न वेदान्तब्रह्मणः कारणत्वं सिध्यतीत्यतः परिदृश्यमानजगतः कारणान्वेषणे क्रिय
माणे वा स्मृतभेदेषु सत्यकपिलस्य भगवतो ज्ञानांशावतारत्वात् तन्मातप्रकारेणैव जगद्व्यवस्थापितेत्येवं प्राप्त उच्यते
न सृष्टिभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिः सर्वप्रकारेषु तस्यैव कारणत्वोक्तेः आकाशादिषु कारणत्वेन ब्रह्म यथाव्य
पदिष्टमेवैकत्रान्यत्रापि तदेव कारणत्वेनोक्तं न तस्य कार्यं करणं च विद्यत इत्यादि निराकरणं तल्लौकिकत्वनिषे
धपरं तस्यैव प्रतीतेः सर्वे वेदलक्षणार्थे वैदिकानाम बाधितार्थकवाक्यत्वस्याभिप्रेतत्वादिति चकारार्थः कार्यप्रकारभेद
स्तु माहात्म्यज्ञापको न तत्त्वबाधकः बहुधा कृतिसामर्थ्यं लोकेपि माहात्म्यसूचकमिति तस्मान्न श्रुतिविप्रतिषेधात्
स्मृतिपरिग्रह इति सिद्धं समाकर्षात् पुनरन्यथाशङ्कापरिहरति नन्तु क्वचिदसद्वा इदमग्र आसीदिति क्वचित्सदेव ५५

सिद्धिः प्राणादयो वाक्यशेषात् नन्त्ववशेषे मंत्रस्यार्थावगमव्यस्तदन्तरोधेन लक्षणापापि ज्योतिःशास्त्रवत्पंचपंचशब्दः।
पंचविंशतिवाचकतया परिकल्प्यस्य श्रुमाहात्म्यार्थमात्माकाशयोराधाराधेयभावः प्रदर्शितस्तत्राप्ययोरेव अतो मंत्रेत
न्मतसिद्धिरित्याशंक्य परिहरति प्राणादयः पंचजनाः वाक्यशेषस्य मंत्रार्थनिर्णायकत्वात् प्राणस्य प्राणमुत चक्षुषश्च
क्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन इति नन्वेकस्य मस्य वाक्यशेषत्वं उच्यते प्राणादयः संज्ञाशब्दाः करणवाचका
स्तेन ज्ञानत्रूपे वाक्रियायां पंचाकार्ये जनयंतीति स्वव्यापारेणेतज्जनेषां करणानां तदपेक्षाभावान्न प्राणादीनां पुनः प्राणादि
मत्वेवाधितं स्यात् भगवतो माहात्म्यविरोधश्च अतः स्वार्थे निर्वाहार्थमन्याये वर्जने पंचजनवाक्यस्य च अतो बुद्धेः पंच
वृत्तीर्जनपतीति प्राणादयः पंचजनाः संशयोपविपर्ययो निश्चयः स्मृतिरेव च स्वापश्च उच्यते बुद्धेर्लक्षणानि वृत्ति
तः पृथगिति तेषां तत्तत्प्रकारकं स्वकार्यजननत्वतः किंतु भगवानिति द्योरेकार्थत्वे सर्वे संगतं स्यात् खंडत्वा
च्छेषत्वं सर्वप्रवर्तकत्वाद्भगवतो न माहात्म्यविरोधः तत्र प्राणपादेन त्वक्घ्राणप्राणापाना हीनारसना चात्रे प्रतिषि
ते न्यत्रेम हीने वारव्यातेज सिध्यन्ता चार्थे चैकत्र भवतः सह भाविता तत्क चिदेकयत्रहणाद्यफ विडुभयग्रहणमिति निने।
जे सर्वे पंचैव भवत्यतिरिच्यते परमाकाशः तस्मात् प्राणादयः पंचजनाः इति न तन्मतसिद्धिः ज्योतिषैकेषामसत्य
न्ने काण्वपाठे अन्नस्याम्नानमिति नास्ति नदा कथं पंचत्वमाह ज्योतिषा संख्यापूर्तिः तेषां यस्मादर्वाके संवत्सरइतिपूर्वपदि

ब्र.सू. स्मरणात् आदित्यादिदेहिनोऽपि पुरुषपर्यन्तं परिच्छिन्नब्रह्मोपासनाभ्युक्तान् तथानिराकृते तमेव ज्ञानार्थमुपससादततः
५६ स्तत्स्वरूपसमीपमभ्यागात् ब्रह्मवादी च कृतः न च क्वैष एतद्बालाके पुरुषोऽशयिष्टेत्यादौ जीवः प्रक्रान्तः तस्मादेवमस्
त्विति चेन्न ब्रह्मणोऽप्यत्र प्रवेशश्रुतेस्तत्र संदेहः जीव एव ब्रह्मसमहितः कर्ता ब्रह्मैव वेति न च जीव एव कर्त्ता सर्वस्य जगतो ब्रह्म
त्वादयः तस्य धर्मा राजत्ववद्यजमानत्ववद्वा अस्मिन्प्रकरणे ब्रह्मोपक्रमे जीवपर्यवसानोक्तेः सर्वत्रैव ब्रह्मत्वेनो
56 क्तो जीव एव कर्ता तथा मति लोकेऽपि जीवकर्तृत्वं सहजं भवेत् वैधर्म्यात् तत्त्वव्यवस्था च एवं सत्यर्थात्प्रकृतेरेव षष्ठीत्येवं प्रा
प्तेऽच्यते जगद्वाचित्वात् एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्मेत्यत्र कर्मेएतच्छब्देन जगदुच्यते पुरुषशब्देन च जीवः
तत्तु जीवात्मकं जगत् ब्रह्मकर्तृकमिति हि पूर्वं सिद्धं तदनुरोधेनात्रापि ब्रह्मपरत्वमेवोचितं न तु सर्वविस्त्रवोऽस्त्रत
कल्पना च अतः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वमिति ज्ञातव्यं प्राणात्मशब्दवाच्यत्वं तु पूर्वमेव सिद्धं तस्मा
न्न जीवाधिष्ठिता प्रकृतिः कारणं जीवमुख्यप्राणलिङ्गादिति चेन्न व्याख्यातं किंचिदाशङ्कापरिहरति नन्वत्र जीव ए
व प्रक्रान्तः क्वैष एतद्बालाके पुरुषोऽशयिष्टेति ब्रह्मत्वथापि न सिद्धमेतादृशेनेतादृशामितिः अतः शयनोत्थानलक्षण
जीवधर्मदर्शनान्नैव ब्रह्मत्वं तत्र जगत्कर्तृत्वं च ततस्तत्रानुपपन्नं प्रकृतौ फलिष्यति अथवा मुख्यप्राणलिङ्गमप्यत्रास्ति
प्राण एवैकधा भवतीति सुषुप्तौ तस्य वृत्तिरुपलभ्यते विद्यमानादेव सर्वोत्पत्तिप्रलयौ मनश्च प्रकृत्यंशः अतोऽनडादेवम ५६

सोमेयं दमग्र आसीत् । नहैकेऽस्याहुरसदेवेदमग्र आसीत् । अव्याकृतमासीत् । नासदासीन्नो सदासीत्तम आसीदित्यादिवा
क्येषु ब्रह्मणोपि विगानेश्रयणेन तद्धैक आहुरिति कं भवत् । एतेन तेषां संभवति नहि सत्तमशक्यं ब्रह्म प्रतिपादयितुं शक्यते ।
असन्नेव स भवतीति वाक्यात् । आदित्यवर्णं तमसः परस्तादिति च । तस्मात्कारणत्वेनापि श्रुतिविप्रतिषेधान्न ब्रह्मकार
णं नेत्येवं प्राप्त उच्यते । समाकर्षात् । आकृष्यत्वेन स्वस्थानाच्चाव्यतत्रुत्पाकर्षः सर्वेषु तेषु वाक्येषु असदादिपदानां न नि
रात्मकत्वार्थोऽङ्गीक्रियते किंतु वैलक्षण्येनासद्वैशब्दवाच्यत्वं च सिद्धं ब्रह्मणः । यथा रुद्रशब्दः कोपशब्दावेदकरुद्रप्रवो चतः सर्वे
वेदा यत्पदमामनन्ति यतो वाचो निवर्तन्ते मनसा सह । आनन्दं ब्रह्मणो विद्वानित्यादि सर्वं विरुद्धधर्मा भगवानुच्यते । एवमनेकविरुद्धशब्द
वाच्यत्वं लोकप्रसिद्धं नादर्शार्थत्वात् समाकर्षादवगम्यते । तेन यथा यथोपासते तेन तथा भवतीति फलज्ञापनार्थं असन्नेव स भ
वैलक्षण्येश पंच १ वतीति यथा केसादीनो मारकः । तद्धैक आहुरित्यत्र सर्वप्रपंचेन्द्रुणोपि स्मर्यते । प्रथमः पक्षः । अव्याकृतमसत्त्वेन तत्त्वं ना
सदासीदिति मनस्तदपि ब्रह्म तमस्यासीदित्यनभिव्यक्तकर्मणोपि भगवत्त्वात् पूर्वकांडेपि तस्मादेवस्य षिः नहि तमसः
स्वेनरूपत्वे लोके संभवति । अतः कश्चिद्विलक्षणं ब्रह्मणो जगत् भगवत्त्वादेव स्वयंकर्तृकं तावसंभवतीवेकवाक्यत्वे अ
ज्ञानाविकैः किरणैर्वा युक्तं तस्मात् शब्दवैलक्षण्येन श्रुतिप्रतिषेधो वक्तव्यं न प्राकाइति सिद्धं । जगद्वाचित्वात् । एवं शब्दविप्र
तिषेधं परिहृत्याथ विप्रतिषेधं परिहरति । कामी न किं ब्राह्मणैर्वाल्लाकाजातं शास्त्रं स वादेवाला किरजातं शास्त्रं वेद ब्रह्मोपदेश

भ॰गी॰ तीति च तस्मादाधारभूतब्रह्मज्ञापनापनार्थत्वाज्जीवस्य ब्रह्मणो लिंगात्तत्प्रकृतिवादइत्यसंगतं वाक्यान्वयात् पुन
५७ र्जीवब्रह्मवादेन प्रकृतिकारणवादमाशंक्य परिहृतमिति बृहदारण्यके चतुर्थषष्ठे च पंचजीवल्कमैत्रेयीसंवादे येना
हं नामृता स्यां किमहं तेन कुर्यामिति विरक्तिमुक्त्वा पदेव भगवान्वेत्त तदेव मे ब्रूहीति पृष्टे तामभिमुखीकृत्य न वारे प
त्युः कामायेत्यादिनात्मतत्त्वापयज्ञानमुपदिशति षष्ठे पुनरुपसंहारे एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः
प्रवव्राजेति तत्राजीवस्य प्रकरणित्वं ब्रह्मणो वेति संशयः तत्रात्मनः प्रियत्वेन स्वप्रतीत्या पुत्राद्यपेक्षया बोध पुनर्जीवस्मे
57 वोपक्रमे आत्मत्वेन तद्वदिति तदनन्तरं दर्शनादिविधानेन तत्सर्वं विदितमिति फलमाह तत्र कथमात्मज्ञानेन सर्वं
ज्ञानमित्याकांक्षायां ब्रह्म तं परादादित्यादिनेदं सर्वं यदयमात्मेत्यनेन तत्सर्वं तन्मयत्वमाह तदनन्तरं कथमस्मिन् संघा
ते आत्मज्ञाने भवतीत्याकांक्षायां दुंदुभ्यादिदृष्टान्तत्रयमाह परंपरया वाद्याभ्यन्तरभेदेन यथा महाकोलाहले दुंदुभेर्हन्य
मानस्य शब्दो ग्रहीतो भवति तत्र करणं दुंदुभिदर्शनं दुंदुभ्याघातदर्शनं वा अनुमानद्वारा विज्ञेनत्र निविष्टं तत
सामान्याकारो भवतीति तथात्मनो बोधककार्याणां संधानेन तत्सामान्याकारो भवतीति तत्र कथं सर्वत्वमित्याकां
क्षायां जतएवेत्यत्र सर्वं नामरूपात्मकं तस्मिन्नेव लीयत इति स यथेत्यादिद्वयेनाह मध्येपि स एव नातिरिक्तो विशती
तिसयथा सैंधवघनइत्यनेन नाशोपेयत्वेन तावन्मात्रतानिकरणायाह मध्येपि स एव नातिरिक्तो विशतीति स यथा सैंधव ५७

ध्यानात् स्रष्टावपि सर्वोत्पत्तिः अतोऽस्मात् प्रकरणात् जीवद्वारा सात्त्वाद्या प्रकृतेः कारणत्वमित्येवं प्राप्ते उच्यते न ह्याख्या
ते एतयोरुभयलिंगत्वमेव नालीत्याश्रयत्वादिति द्वेषोगादित्यत्र सर्वमेव कार्यं भगवत एव नान्यस्मादिति अतोऽस्मात्
ब्रह्मवाद एव सिद्धान्त न प्रकृतिवादः अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके स्वमतेन परिहारमुक्त्वा निपु
ण धर्मवादेनापि परिहारमाह सापप्रत्तिवोधोर्थो जीवधर्मो वेचवत्तरादिलप्रायारत्वे प्राणास्येति तस्मिन्नपि पते अन्यार्थं
तु धर्मकीर्तनेन वमेदेहितविशाकरणमवपंपकर्तव्यमिति तत्पश्यः ब्रह्मप्रतिपत्त्यर्थमेव जीवतयोरद्धमोमः तिवेलतएव
न प्राणकीर्तनमात्रप्रवह्मवोपक्रान्तएतदवगम्यते तत्राह तपक्रमोपसंहाराभ्यामेवावगम्यते योवैवालाकएतेषां
पुरुषाणामित्युपक्रमेभ्य ब्रह्मैवनिर्दिष्टं तेतज्ज्ञानेनाप्रराजयः सर्वेषांभूतानांश्रेष्ठः स्वाराज्यमाधिपत्यं चेतिति फले
न श्रेतद्द्वयमन्यस्मिन्संभवति अपिच प्रश्नव्याख्यानाभ्यांकैष एतद्बालाके पुरुषोशयिष्टेति प्रश्नः तत्रजीवस्य ज्ञातत्वाद
धिकरणमेव न ज्ञाते यत्रैष एतद्बालाके पुरुषोशयिष्टेति व्याख्यानेन न हि नाडीषु शयितेव्याख्याति किंतुप्रतिज्ञातं
ब्रह्मकथमेतदवगम्यते नाडीव्यतिरिक्तशान्त्माज्ञायतइति तत्राह एवमेकेशाखिनो वाजसनेयिनः तत्रापि हम
वालाकिब्राह्मणे महोवाचाजातशत्रुर्यत्रैष एतत्सुप्तोभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञान
मादाय य एषोन्तर्हृदय आकाशस्तस्मिन् शेते इत्यत्राकाशशब्दो ब्रह्म मतमाम्नातं सम्पन्नोभवतीति च स्वं ह्यपीतो भवा

अ.ए. त्वात् विषयस्पर्शो विज्ञानत्वमपि तेषामेवं सति सर्वमेव संगतं भवेत् अतो वाक्यान्वयाज्जीवपरत्वेपेन प्रकृतिवादः
स्यादिति प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः नियतधर्मवादिनामपि मतेन प्रकृते सिद्धांते वक्ष्यपक्षोनेनाणापाहातत्र ब्रह्म
५८ वादैकदेशिवादाः संति तत्र जीवो नाम स्वस्य भोगाति स्यन्मर्थं स्वांशो भगवता कृतो विस्फुलिंगवदित्याश्मरथ्यो मन्यते स
नादिसिद्ध एव जीवश्चैतन्यमात्रेण शरीरादिसंघाते प्रविष्ट इति चितितन्मात्रेण प्रवेशश्च मोद इति चौडुलोमिराचार्यः काश
कृत्स्नस्तु आत्मसत्ता विषयभोक्तृरूपेण भगवानेव जीव इति तेपि स्वमतानुसारेणात्र परिहरंति तत्र पुत्रादिप्रियस
58 हवचनात् जीवप्रकरणमेवैतदित्याशंक्य जीवोपक्रमस्यान्यत प्रयोजनमित्याह प्रतिज्ञासिद्धेरिति षष्ठीत स्यालि
गं अंशत्वाज्जीवस्य तदभेदेनोपक्रमः प्रतिज्ञासिद्धेर्लिंगं भवति एकविज्ञानेन सर्वविज्ञाने प्रतिज्ञा तस्यैवांशरूपत्वाद्घट
मानत्वात् तस्याप्यतन्मात्रकं यथा जीवो भगवानेवं जड इत्याश्मरथ्यो मन्यते श्रोत्रत्वादिविषयस्तु भगवानेवन तस्मा
न्नियतधर्मजीववादेपि पुजीवोपक्रमो दोषः उत्क्रमिष्यत एवंभावादित्यौडुलोमिः लिंगमित्यनुवर्तते पदत्रं जीवोपक्रमे
ण भगवतः श्रवणादिकमनुकृत्वान्ततसंसारभावाद् उत्क्रमिष्यतो जीवस्य लिंगमनुक्तो जीवो भगवानेव भविष्यतीति ज्ञापकमः
न्यथा सैव कथमसता भवेदिति इति शाणोहंतो स्तिपाविष्य मार्यगीन प्रियवैराग्यार्थं च जीवोपक्रमः कर्तव्य एवेति औ
डुलोमिराचार्यो मन्यते तस्मात् भिन्नजीवपक्षे विना तद्रूपेण अवस्थितेरिति काशकृत्स्नः लिंगमित्येव भगवद्वाक्या ५८

वद्यत उत्पन्नेनाहार्थ्यत्वेन तावन्मात्रतानिराकरणपाद् नयेत्यसंज्ञास्तीति कार्यातिरिक्तरूपं कथयितुं नशक्यात उक्ति त
त्रविशेषाकांक्षायामतिरिक्ताकथने वंचकत्वमाशंक्य तत्परिहारायाह स हो वाचेति अविनाशीत्यनेन कार्यवैलक्ष।
ण्यसिद्धवत्कारिणोक्ता विषयसंबंधेन संसारमाह मात्रासंसर्गस्तस्य भवतीति विशेषतस्तु कथनेहेतुमाह यद्वैतन्।
मित्यादिना यावत्समाप्ति च वस्तुरूपमेव पश्यतिनात्मानं ननु रूपमप्यात्मेति चेन्न तत्रापश्यन्वै तत् द्रष्टव्यत्वेन तत्पश्य
तिन हि द्रष्टुस्वरूपं दृष्टिज्ञानेन ज्ञातं भवति अतद्रूपत्वात् एवं द्रष्टुर्दृश्यव्यवहारे अज्ञानावस्थायां विशेषतस्तु ज्ञान
मशक्यमुक्त्वा ज्ञानोत्तरं कर्मकर्तृभाव एव नास्तीत्याह यत्र वा अन्यदिव स्यादित्यादिना इदमेवेदं ज्ञानममृतत्वमिति
तत्रादिमध्यावसानेषु जीवप्रकरणमित्येव प्रतिभाति तस्य ब्रह्मता जगत्कर्तृत्वमित्युक्तं यः नन्वतः स्माद्रूप्यत न ब्रह्मत्वेन
वक्तुं युक्तमर्थविरोधाच्च तस्मादेद्दृष्टिविषयाकालनामेतस्यायेनात्मार्थ्यत्वाद्ब्रह्मजगत्कारणमिति प्रकृतिवाद एव युक्त।
इत्येवं प्राप्ते उच्यते वाक्यान्वयात् इदं वाक्यं भगवत्येवान्वेति नात्र जीवप्राधान्यं गोधीपिसर्वत्र भगवदन्वयेनैव जीवस्या
पि प्रियत्वेन तस्यैव मस्तु कसर्वोपनिषदन्तरोधेनैवास्यार्थस्य वक्तुमुचितत्वात् तमेव विदित्वातिमृत्युमेतीति ज्ञानेदा
र्ढ्यवत्वल्लिमानि भूतानि जायन्ते सर्वं एवात्मानो व्युच्चरन्तीति एकत्वे वा नंदपातीत्यादिश्रुतिसहस्त्रैर्निःसंदिग्धं ब्रह्मणः
स्वरूपं कार्यमशक्य प्रतिपादितानुनीदमपि वाक्यं तत्परमेवाचितं सर्वव्यवहारस्य तन्मूलकत्वेन पूर्वमुक्तत्वात्।

अ.ण. पचारव्यावृत्यर्थं उपक्रमोपसंहारवत् प्रतिज्ञामात्रत्वेऽदृष्टान्तापि भवेन दृष्टान्तमात्रत्वेचेनुमानविषयास्यात् तथास
५६ तिसर्वसमानधर्मवित् ब्रह्मस्यात्रसमवायिकारणं उभयोर्ग्रहणेन प्रतिज्ञायादृष्टमेवहारमितिसमवायत्वसिद्धिः कार्यका
रणयोर्भेदाभेदमतिराकरणाय पिंडमणिनखनिकृंतनग्रहणेन यासतिपत्रकं विज्ञगवान् ज्ञातः सर्वं च ज्ञातो भवति सर्वं
च ज्ञाते भवतीति सामान्यलक्षणप्रत्यासत्तिनिराकरणाय चवाचारंभणं विकारोनामधेयमिति अलीकत्वेनिराकरणाय च
59 मृत्तिकेत्येवसत्यमिति ब्रह्मत्वेनैवतगतः सत्यत्वेनान्यथेति सामान्यलक्षणप्रत्यासत्तिनिराकरणं च स्पष्टमेवाग्रे।
त्रीणिरूपाणीत्यत्रकरिष्यति अतोब्रह्मरूपेणसत्यस्यजगतोब्रह्मैवसमवायिकारणं देहात्मबुद्धिस्तुसत्याविकारबु
द्धेर्दोषः श्रुतिसामर्थ्यंप्रमाणमित्युक्तं तस्माद्ब्रह्मैवसमवायिकारणंनप्रकृतिः अभिध्योपदेशाच्च लिंगांतरमाह।
सोकामयत बहुस्यांप्रजायेयेतीत्यत्रकामनेनस्याभिध्याने आत्मकामत्वाच्चकामनानंतरमभिध्याने स्रष्टृत्वमुपदिश्यते बहुस्या
मितिस्वस्यैव बहुरूपत्वाभिध्यानेन सृष्टं स्वयमेवभवति स्वर्णस्यानेकरूपत्वे स्वर्णप्रकृतिकत्वएव अध्यास
भावात् गौणत्वायत्तेरनहिस्वात्यबहुभवनेयोगीनोसंभवति सर्वंभवतसामर्थ्यान्तद्वत्संभवतिगौणकल्पनापाअन्या
प्यत्वात् चकारादिदंसर्वंयदयमात्मेति कार्यस्यब्रह्मत्वश्रुतिर्ब्रह्मप्रकृतित्वेसंभवतिनान्यथा अथवासर्वंखल्विदंब्रह्म
तज्जलानिति शांतउपासीतेति तस्यजगद्रूपत्वेनाभिध्यानमुपदिश्यते तद्ब्रह्मसमवायित्वेघटतइतिचकारादेकत्वेन। ५६

जीव इति अतः संसारदशायामपि जीवो ब्रह्मेति नात्राक्रमणमुपचारो वा अन्यथा कथमात्मनस्तु कामाय सर्वं प्रियं
भवतीति न त्वन्यस्य सर्वे वी प्रियं भवति मोक्षस्तु ज्ञानमेव उज्जरत्र कर्त्तव्याभावात् अवस्थापार्थक्यवसायात्सिद्धान्ताद्विशे
षः इति शाङ्केनेन तावदेरखिल्वम् तत्त्वमित्युपसंहारो हेतुरस्य पक्षस्येति काशकृत्स्नो मन्यते तस्माज्जीवो प्रक्रमो भगव
त एवावस्थाविशेषो जीव इत्यस्य पक्षस्य लिङ्गं तस्मान्मैत्रेयीब्राह्मणेनापि जीवद्वारा प्रकृतिकारणवादाक्षिप्तिरि
ति सिद्धं प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् एवं प्रकृतिकारणवादनिराकरणेन ब्रह्मण एव कारणत्वे सिद्धे पूर्वं जर
नीयतपोमयस्यापततपदं परिहर्त्तुमधिकरणमारभते ननु ब्रह्मकारणता न निराक्रमेः श्रुतिसिद्धत्वात् किन्तु सम
वायिकारणं प्रकृतिरेव कार्यकारणयोरैलक्षण्यात् समवायिकारणत्वे गोऽधिदृकार्येऽन्यत सर्वं भगवानस्त्वप्रपत्र
तेन्वसमः वायिनिमित्तयोर्भेदः कर्मन्यपि श्रुतिस्मृतिसमवायोऽधर्मे एवं ब्रह्मवादेऽपि स्मर्तव्या प्रकृतिः समवायिकार
णं ब्रह्मनिमित्तकारणमित्येवं प्राप्ते उच्यते प्रकृतिश्च निमित्तकारणं समवायिकारणं च ब्रह्मैव प्रकृतिपदप्रयोगात्
स्मृतिसिद्धत्वतीयसर्वधर्मोपदेशः चकारात् पत्रेत्यादि सर्वे संशदः ज्ञातमेतत् प्रतिज्ञादृष्टान्तानुपरोधात् प्रतिज्ञा अ
पि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति दृष्टान्तः यथैकेन मृत्पिण्डेन सर्वं मृन्मयं
विज्ञातं स्यादित्यादि प्रतिज्ञादृष्टान्तयोरनुपरोधः अबाधनं तस्मात्समवायिकारणज्ञानेन न दृ कार्यं चाने उभयोर्ग्रहणम्

अ.णु. वणात्मवादनिराकरणप्रकारः तत्र श्रुतिस्मृतीप्रमाणप्रसिद्धिर्गीयत इति श्रुतिस्तावत् सदेव सोम्येदमग्र आसीदे
६० कमेवाद्वितीयमिति एवमेकमेव प्रतिज्ञाते आकाशादेरानंदाद्येवेशादेवकारेणानन्यकारणत्वं जगतो वर्ण्यते
इतरापेक्षायां हेतापत्तेः गीयते च कर्तारमीशं पुरुषं ब्रह्मयोनिं यद्भूतयोनिं परिपश्यन्ति धीरा इति च मम योनिर्महद्
ब्रह्म तस्मिन्गर्भं दधाम्यहमिति नासौ ब्रह्म समादधाति अहं बीजप्रदः पितेति च अतः पुरुषोत्तमभावेन तथात्वे तस्मा
60 योनिरपि भगवानेव एकस्यापि सर्ववीर्यं जीवस्य भगवानिति इदं सर्वं पदयमात्मेति सिद्धं तस्मात्केनाप्यंशेन प्रकृतिप्र
वेशो नास्तीति प्राहुः तेषां त्वमतस्य सिद्धं एतेन सर्वे व्याख्याताः ब्रह्मवादव्यतिरिक्ताः सर्वे वादाः अवैदिकाः तेदविहन्ता।
अभ्यमाहुः एतेन ब्रह्मवादस्थापनपूर्वकं सांख्यमतनिराकरणेन सर्वेषामपानं जलादिवादा व्याख्याताः अवैदिकाश्च तत्प
युक्ताश्चवैदिकानां द्विवेदः प्रमाणं तस्मिन्न व्याकुलेभ्यो इति मतियत्रापि एव सर्वे वादा इति एतस्यार्थः विस्तरेणाग्रे व
दयतश्चाहृत्तिरध्यायसमाप्तिबोधिका इति श्रीवेदव्यासमतवर्त्ति श्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथ
माध्यायस्य चतुर्थः पादः प्रथमोऽध्यायः समाप्तः ॥ संवत् १८ ९७ ॥ श्रीकृष्णायनमः ॥ ॥

पृथक्त्वेन वक्तुं याविश्वतोमुखमिति साक्षाच्चोभयाम्नानात् लिङ्गमुक्त्वा श्रुतिमेव प्रमाणमाह साक्षात्त्वित्येव समवा-
यित्वमुच्यते चकारान्त्यापिकर्तृत्वं श्रुत्योच्यते तत्राह उभयाम्नानात् ब्रह्मणः एकस्मात् ब्रह्मण एव वचसः सृष्टिप्रलययोः आ-
म्नानात् सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्तीति यद्ध सर्वस्य जगतः प्रभवः प्रल-
यश्चैतेन न घटते तस्मिन्निमित्तत्वे संभवति मृत्पिण्डादिघटत्वोपलब्धेः लोकवेदत्वाद्येन साक्षात्त्वात् तस्माद्भगवानेव सम-
वायिकारणं आत्मकृतेः परिणामात् ननु स एव सर्वं सृजति स एवावतिष्ठत इति चेति कर्तृत्वप्रतीतेराकाशादिवाक्यस्यौ-
पचारिके भविष्यतीति तन्निराकरणमाह आत्मकृतेः तदात्मानं स्वयमकुरुतेति स्वस्यैव कर्मकर्तृभावात् स्वकृत-
त्वं च वाह्यलौकिकत्वेन घापिज्ञानार्थमनुपपत्तिमाह परिणामात् परिणमते कार्याकारेणेति अविकृतमेव परिण-
मते सुवर्णं सर्वाणि च तैजसानि न हीदं लौकिकत्वात् ब्रह्मकारणत्वमेव घटते पूर्वविस्थात्पर्यावभासस्तु कार्ये
अनुत्पन्नेऽपि घटे गीकर्तव्यः वदतीति च श्रुतेरप्राप्तमूलत्वादिति अत्यातिच युक्तिदूषणानि परिहरिष्यति तस्मा-
न्न ब्रह्मपरिणामत्वे न्यूनाकार्यमिति जगत्समवायिकारणत्वं ब्रह्मण एवेति सिद्धं योनिश्च हि गीयते चेतनेषु किंचिद-
शंकापरिहरति न त्वस्तु जडानां ब्रह्मैव कारणत्वे चेतनेष्वपि योनिबीजयोः समवायित्वदर्शनात् पुरुषत्वात् भगवतो
योनिरूपा प्रकृतिः समवायकारणं भवतु शुक्रशोणितसमवेतत्वाच्छरीरस्येत्याशंकापरिहरति योनिश्च ब्रह्मे-

सोयं नाम्नैर्निर्दिष्टो नैमित्तिकः परिचयः स्थितो यो ज्ञेयः तथापि तत्परमफलमपे तन्नागवमाली ति
भाव इत्यलं विस्तरेण ॥ ज्ञानी तत्परं तत्त्वं यशो हि मार्गलाविनेन दर्शाह निषेधमाज्ञा तस्मान तत्त्वधः
१ नानामननध्यानविनाशानंतमोचेदानंदस्वरूपविकासनेयुः ध्यानिः कृतोपभोविभाष्यभाष्ये
तत्स्वरूपानुरूपावतनानंतवर्णेस्त २ पुरुषोत्तमस्वरूपस्तुतिर्दृष्टिसंयोगिनस्तत्कौपवरात्फला
वनपरायणोऽलीलया स्मितामनमनद्दृष्टिभिः पौरुषोपलाभ्याति हि रूपाद्यवस्वरूपावतिस्मृतिस्मि
61 रक्षणानतैं ३ श्रीमदाचार्यचरणानुज्ञे ॥ निवेदितो निनमस्य मवैनमपितेस्मृता प॰ ४ः ॥
इति श्रीमद्वेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य चतु
र्थः पादः ॥ संवत् १८ ६० कार्तवदी १३ ॥ रामाय नमः ॥

62